# संस्कृतवार्ता:

दिनाङ्क : 25/01/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याम् इण्डोनेशियादेशस्य राष्ट्रपतिना प्रबोवो-सुबियान्तो इत्यमुना साकं मन्त्रणां समाचरितवान्।
- राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अद्य गणतन्त्र-दिवसस्य पूर्वसन्ध्यायां राष्ट्रम् सम्बोधयिष्यति।
- गणतन्त्रदिवसस्य शुभावसरे आरक्षि-अग्निशमन-गृहरक्षक-नागरिकसुरक्षासेवानां द्विचत्वारिंशदधिक-नवशत-संख्यकेभ्य: कर्मिभ्य: वीरता-सेवा-सम्माने प्रदास्यति।
- अद्य अशेषे हि देशे राष्ट्रिय-मतदातृ-दिवस: परिपाल्यते।
- अमरीकादेशीयेन सर्वोच्चन्यायालयेन मुम्बई-आतङ्कीयाक्रमणस्य दोषिण: तहव्वुर-राणा इत्येतस्य समीक्षायुतां याचिकां निरस्तीकृत्य तस्य भारत-प्रत्यर्पणाय स्वीकृति: प्रदत्ता।
- ऑस्ट्रेलिया-ओपन-टेनिस-इत्येतस्यां प्रतिस्पर्धायां मैडिसन-कीज़ इत्यसौ ग्रैण्ड-स्लैम-इति उपाधिं प्राप्तवती।

---------------------------

भारत-इण्डोनेशियावार्ता:

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याम् इण्डोनेशियादेशस्य राष्ट्रपतिना प्रबोवोसुबियान्तो इत्यमुना साकं मन्त्रणां समाचरितवान्। तदनु भारत-इण्डोनेशिया-देशाभ्यामद्य स्वास्थ्यसहयोग-

परम्परागतचिकित्सा-सागरीय सुरक्षा-आङ्ककीयविकासानां क्षेत्रेषु उपस्थापितेषु सन्धिपत्रेषु हस्ताक्षंकृतम्। अत्रावधौ तृतीयस्य भारत-इण्डोनेशिया-मुख्य-कार्यकारि-अधिकारी-मञ्चस्य प्रतिवेदनानि अपि प्रस्तुतानि। उभयो: देशयो: सञ्जात-द्विपक्षीय-वार्तानन्तरं निजवक्तव्ये प्रधानमन्त्री नरेन्द्रमोदी न्यगादीत् यत् राष्ट्रपतिना प्राबोवेइत्येतेन सह पारस्परिक-सहयोगस्य विभिन्नायामेषु व्यापकी चर्चा समनुष्ठिता। श्रीमोदिना अग्रे प्रोदीरितं यत् रक्षाक्षेत्रे सम्पद्यमानं सहयोगं वर्धयितुं भारत-इण्डोनेशिया-देशौ रक्षाविनिर्माण क्षेत्रे आपूर्ति-श्रृङ्खलायाञ्च मिलित्वा कार्यं सम्पादयितुं निर्णयं गृहीतवन्तौ। प्रधानमन्त्री अवोचत् यत् उभाभ्यां देशाभ्यां सागरीय-सुरक्षा-आन्तर्जालिकापराधा-आतङ्कवाद-विषयेभ्य: निवारणाय निजसहमति: प्रकटिता।

अत्रावसरे इण्डोनेशियादेशीय: राष्ट्रपति: सुबियान्तो इत्येष: भारतस्य स्वकीयायां राजकीय यात्रायां प्राप्तसम्मानाय आभारभारं प्रकटितवान्। श्रीसुबियान्तो इत्यसौ प्रोक्तवान् यत् उभयो: देशयो: मध्ये पारस्परिक-कल्याणानां प्रमुखेषु क्षेत्रेषु विस्तृताचर्चाजाता इति।

---------------------------

## राष्ट्रपतिः सम्बोधनम्

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः षडसप्ततितमस्य गणतन्त्र दिवसस्य पूर्वसन्ध्यायां राष्ट्रम् अद्य सम्बोधयिष्यति। सम्बोधनमिदं आकाशवाणी - दूरदर्शनयोः सर्वासु वाहिनीषु हिन्दी - आंग्ल-भाषयोः सायं सप्तवादने प्रसारयिष्यते। दूरदर्शन वाहिन्यां हिन्दी- आङ्ग्ल- भाषयोः सम्बोधनस्य प्रसारणानन्तरम् दूरदर्शनस्य क्षेत्रीय-वाहिनिभिः प्रादेशिक भाषासु प्रसारणं भविष्यति। आकाशवाणी रात्रौ सार्ध-नववादने क्षेत्रीय-भाषा-संस्करणस्य अस्य प्रसारणं करिष्यति।

---------------------------

## गणतंत्रदिवस- शौर्यपदक

गणतन्त्रदिवसस्य शुभावसरे आरक्षि-अग्निशमन-गृहरक्षक-नागरिकसुरक्षासेवानां द्विचत्वारिंशदधिक-नवशत-संख्यकेभ्य: कर्मिभ्य: वीरता-सेवा-सम्माने प्रदास्यति। एतेषु पुरस्कृतेषु पञ्चनवतिः कर्मचारिणः शौर्यस्य कृते चयनिताः सन्ति। अयं पुरस्कार: जीवनं, सम्पत्तिं च रक्षणाय, अपराधनिवारणं अपराधिनः निगडनाय वा दुर्लभं स्पष्टं च शौर्यस्य च आधारेण

प्रदीयते। ततः परं एकोत्तरैक शतं विशिष्टकर्मचारिणः विशिष्टसेवायाः कृते राष्ट्रपतिपदकेन, षड्चत्वारिंशदधिक-सप्तशतं-यावत् कर्मचारिणः उत्कृष्टसेवायै पुरस्कृताः भविष्यन्ति।

----------------------------

राष्ट्रिय-मतदातृ-दिवस:

अद्य अशेषे हि देशे राष्ट्रिय-मतदातृ-दिवस: परिपाल्यते। अत्रावसरे राष्ट्रपति: द्रौपदीमुर्मु: कथितवती यत् गौरवहो विषयोऽयंविद्यते यत् भारतं विश्वस्य संवेदनशीलं च लोकतन्त्रं निगद्यते। अद्य नवदिल्ल्यां पञ्चदशमं राष्ट्रिय-मतदातृ-दिवस-कार्यक्रमं सम्बोधयन्ती राष्ट्रपति: अवदत् यत् भारतदेश: लोकतन्त्रस्य जननी अस्ति अपि च देशेऽस्मिन् प्राचीनकालादेव लोकतान्त्रिकप्रक्रिया विद्यमानास्ति इति। आधुनिकविश्वाय भारतम् उत्कृष्टम् उद्धरणमपि वर्तते।

विधिन्यायमन्त्री अर्जुनराममेघवाल: शान्तिपूर्णरीत्या निष्पक्षतया च निर्वाचनं कारयितुं निर्वाचनायोगस्य प्रयासान् अभिनन्दितवान्। मुख्यनिर्वाचनायुक्त: राजीवकुमार: अपि प्रतिपादितवान् यत् भारते अधुना मतदातृणां सङ्ख्या नवनवतिकोट्यधिकम् यावदस्ति।

----------------------------

महाकुम्भ

सम्प्रति महाकुम्भसम्बद्धा: वार्ता: श्रूयन्ताम्।

तीर्थराजे प्रयागराजे-नगरस्य महाकुंभे आयुष्-मन्त्रालयः भक्तानां आगन्तुकानां च कृते निःशुल्क-स्वास्थ्यसेवाः प्रददाति। अस्माकं वार्ताहर: सूचितवान यत् अद्य पर्यन्तम् एकविंशत्यधिकैकलक्ष सङ्ख्यका: श्रद्धालव: आयुष्-सेवायाः लाभान् प्राप्तवन्तः इति। आयुष-मन्त्रालयः महाकुंभे देशविदेशभ्यां आगम्यमानोनां भक्तानां कृते निःशुल्क-स्वास्थ्यसेवाः प्रददाति। अशीति वैद्यानां दलमेकं विंशति बाह्यरोगिविभाग द्वारा अहर्निशं स्वास्थ्यसेवाः प्रद्दति। वैदेशिकै भक्तै: अपि ओ. पी. डी. इति परामर्शसहितानि आयुष्-सेवाः उपयुञ्जन्ते। वृद्धानां स्वास्थ्यस्य विषये विशेषम् अवधानं दातुं आयुष्-वैद्यानाम् एकः समूहः समर्पितः अस्ति। एतदतिरिच्य, मोरार्जी देसायी-राष्ट्रिय-योग-संस्थानस्य प्रशिक्षकैः सङ्गम्-क्षेत्रे निर्दिष्टस्थानेषु प्रतिदिनं

प्रातःकाले योग-सत्राणि आयोज्यन्ते। एतेषु सत्रेषु अन्ताराष्ट्रियभक्तानां सहभागिता स्थानीयानां वैश्विकानां च जनेषु आयुष्-सेवां प्रति वर्धमानं रुचिं विश्वासं च प्रतिबिम्बयति। (संस्कृत-एकांशतः निधितिवारी)

---------------------------

अमरीकादेश:-तहव्वुराणा

अमरीकादेशीयेन सर्वोच्चन्यायालयेन मुम्बई-आतङ्कीयाक्रमणस्य दोषिण: तहव्वुर-राणा इत्येतस्य समीक्षायुतां याचिकां निरस्तीकृत्य तस्य भारत-प्रत्यर्पणाय स्वीकृति: प्रदत्ता। अवधेयं वर्तते यत् भारतं पाकिस्तान-देशीयस्य कानडादेशीयस्य व्यवसायिन: राणाइत्येतस्य प्रत्यर्पणस्य अभ्यर्थनं करोतीति। तस्योपरि अष्टाधिक-द्विसहस्रतमवर्षस्य मुम्बई आतङ्क्याक्रमणे मुख्यभूमिकाया: निभालनस्य आरोपो विद्यते।

---------------------------

ऑस्ट्रेलिया-ओपन-टेनिस- प्रतिस्पर्धा

ऑस्ट्रेलिया-ओपन-टेनिस-इत्येतस्यां प्रतिस्पर्धायां मैडिसन-कीज़ इत्यसौ ग्रैण्ड-स्लैम-इति उपाधिं प्राप्तवती। निर्णायकचक्रे अनया क्रीडिकया आर्यना-सबालेंका इत्येषा पराजिता।

---------------------------

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: प्रति-रविवासरे मध्याह्ने सार्धैक-वादनत: अर्थात् श्व: भविष्यति। कृपया श्रृण्वन्तु।

।। इति वार्ता:।।